[A-22] **SEAT No.________** **No. of Printed Pages: 02**

# Sardar Patel University

**M. A. (Previous) (External) Examination Sanskrit OLD**
**Friday Date: 05/04/2019 Time: 10.00 A.M. to 01.00 P.M.**

**SAN-402: P-II: Vedant:** Brahmasutra Shankarbhasya (Selected Sutras), Darshanic Shahitya (Jain-Bauddha & Nyaya-Vaisheshik)

**Total Marks: 100**

પ્રશ્ન: ૧ ગમે તે બે ગદ્યખંડ સાનુવાદ સમજાવો: (૧૪)

१. ब्रह्मणो जिज्ञासा ब्रह्मजिज्ञासा। ब्रह्म च वक्ष्यमाणलक्षणं 'जन्माद्यस्य यतः' इति। अत एव न 'ब्रह्म' शब्दस्य जात्याद्यर्थान्तरमाशङ्कितव्यम्। ब्रह्मण इति कर्मणि षष्ठी न शेषे; जिज्ञास्यापेक्षत्वाजिज्ञासायाः, जिज्ञास्यान्तरा-निर्देशाच्च। ननु शेषषष्ठीपरिग्रहेऽपि ब्रह्मणो जिज्ञासाकर्मत्वं न विरुध्यते, संबन्धसामान्यस्य विशेषनिष्ठत्वात्। एवमपि प्रत्यक्षं ब्रह्मणः कर्मत्वमुत्सृज्य, सामान्य-द्वारेण परोक्षं कर्मत्वं कल्पयतो व्यर्थः प्रयासः स्यात्। न व्यर्थः ब्रह्माश्रिताशेषविचारप्रतिज्ञानार्थ-त्वादिति चेत् न, प्रधानपरिग्रहे तदपेक्षितानामर्थाक्षिप्तत्वात्। ब्रह्म हि ज्ञानेनाप्तुमिष्टतमत्वात्प्रधानम्। तस्मिन्प्रधाने जिज्ञासाकर्मणि परिगृहीते यैर्जिज्ञासितैर्विना ब्रह्म जिज्ञासितं न भवति, तान्यर्थाक्षिप्तान्येवेति न पृथक्सूत्रयितव्यानि।

२. अन्ये तु वर्णयन्ति- द्विविधं हि शरीरं स्थूलं सूक्ष्मं च। स्थूलं यदिदमुपलभ्यते। सूक्ष्मं यदुत्तरत्र वक्ष्यते- 'तदन्तरप्रतिपत्तौ रंहसि संपरिष्वक्तः प्रश्ननुरूपणाभ्याम्' इति। तच्चोभयमपि शरीरमविशेषात्पूर्वत्र रथत्वेन सङ्कीर्तितम्, इह तु सूक्ष्ममव्यक्तशब्देन परिगृह्यते सूक्ष्मस्याव्यक्तशब्दार्हत्वात्। तदधीनात्वाच्च बन्धमोक्षव्यवहारस्य जीवात्तस्य परत्वम्, यथाऽर्थाधीनत्वादिन्द्रियव्यापारस्येन्द्रियेभ्यः परत्वमर्थानामिति।

३. तु शब्दः आशङ्काम् अपनुदति। न खलु मृदब्रवीत् इत्येवंजातीयकया श्रुत्या भूतेन्द्रियाणां चेतनत्वम् आशङ्कनीयम्, यतोऽभिमानिव्यपदेश एषः। मृदादि-अभिमानिन्यो वागादि-अभिमानिन्यश्च चेतना देवता वदनसंवदनादिषु चेतनोचितेषु व्यवहारेषु व्यपदिश्यन्ते, न भूतेन्द्रियमात्रम्। कस्मात् विशेष-अनुगतिभ्याम्। विशेषो हि भोक्तृणां भूतेन्द्रियाणां च चेतन-अचेतनविभागलक्षणः प्राक् अभिहितः। सर्वचेतनतायां चासौ नोपपद्येत। अपि च कौषीतकिनः प्राणसंवादे करणमात्राशङ्काविनिवृत्तये अधिष्ठातृचेतनपरिग्रहाय देवताशब्देन विशिंषन्ति- 'एता ह वै देवता अहंश्रेयसे विवदमानाः' इति।

४. समवाय-अभ्युपगमात् च- तदभावः, इति प्रकृतेन अणुवादनिराकरणेन संबध्यते। द्वाभ्यां च अणुभ्यां द्व्यणुकम् उत्पद्यमानम् अत्यन्तभिन्नम् अणुभ्याम्, अण्वोः समवैति इति अभ्युपगम्येते भवता। न च एवम् अभ्युपगच्छता शक्यते अणुकारणता समर्थयितुम्। कुतः साम्यात् अनवस्थितेः। यथैव हि अणुभ्याम् अत्यन्तभिन्नं सत् द्व्यणुकम् समवायलक्षणेन संबन्धेन ताभ्यां संबध्यते, एवं समवायोऽपि समवायिभ्योऽ-त्यन्तभिन्नः सन् समवायलक्षणेन अन्येन एव संबन्धेन समवायिभिः संबध्येत, अत्यन्तभेदसाम्यात्। ततश्च तस्य तस्य अन्योन्यः संबन्धः कल्पयितव्यः इति अनवस्था एव प्रसज्येत।

પ્રશ્ન: ૨ ગમે તે બે સૂત્રો સમજાવો: (૧૦)

१. **मान्त्रवर्णिकमेव च गीयते। १/१/१५**
२. **अक्षरमम्बरान्तधृतेः। १/३/१०**
३. **भोक्तृ आपत्तेः अविभागश्चेत् स्याल्लोकवत्।२/१/१३**
४. **गौण्यसंभवात्। २/३/३**

પ્રશ્ન: ૩ ગમે તે બે વિશે નોંધ લખો: (૨૦)

૧. પંચખ્યાતિ

૨. બ્રહ્મસૂત્રના ભાષ્યકારો

૩. સૂત્ર-ભાષ્ય-અધિકરણ

૪. ભાગવતમતનું ખંડન

પ્રશ્ન: ૪ શંકરના મતે જીવનું સ્વરૂપ ચર્ચો (૧૬)

અથવા

પ્રશ્ન: ૪ શંકરે કરેલું બૌદ્ધમત ખંડન ચર્ચો (૧૬)

પ્રશ્ન: ૫ જૈનોના મતે જીવ-અજીવ વિશે સવિસ્તર ચર્ચા કરો (૨૦)

અથવા

પ્રશ્ન: ૫ બૌદ્ધોનો ક્ષણભંગવાદ સમજાવો (૨૦)

પ્રશ્ન: ૬ ન્યાયદર્શનમાં થયેલ પ્રત્યક્ષ પ્રમાણ નિરૂપણ વિશે સવિસ્તર નોંધ લખો (૨૦)

અથવા

પ્રશ્ન: ૬ વૈશેષિકોના મતે દ્રવ્ય વિશે સવિસ્તર નોંધ લખો (૨૦)

— X —

(2)